


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2022; 4(1): 380-382
Received: 30-01-2022
Accepted: 09-03-2022

**डॉ. संतोष कुमार पाठक**
बेलाशंकर, वार्ड नं. – 3, निकट – पी.टी.सी., लालबाग, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ. संतोष कुमार पाठक**
बेलाशंकर, वार्ड नं. – 3, निकट – पी.टी.सी., लालबाग, दरभंगा, बिहार, भारत

# ज्यौतिषशास्त्रस्य महत्त्वं वैज्ञानिकत्वं च

**डॉ. संतोष कुमार पाठक**

**सारांश**
विदितसकलशास्त्राणामष्टादश ऋषीणां महत्तया चपसचर्यया ज्ञानचक्षुषा निर्मितं पवित्रं परमं पुण्य जनकं ज्योतिषशास्त्रं काल विधानशास्त्रं विद्यते। ''पश्यन्ति यं सूरयः'' आर्षवचनरसाद् षड़वेदांग मध्ये चक्षुरूपं ज्योतिषशास्त्रं कालावच्छिन्न रूपेण सर्वत्र विराजतें। ''ज्योतिषा बाधतेतमः तमसो मा ज्योतिर्गमय, असतो मा सद्गमय'' इत्यार्षवचनत्रयेण परिभाषत्वेनांकलंकरणीयं ज्योतिषशास्त्रम्। किमिदं ज्योतिषं, विषये कथितम्– वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमकल्मषम्। विनैतदखिलं श्रौतं स्मार्त्त कर्म न सिध्यति।। श्रौतकर्म जनकता स्मार्त्तकर्म जनकता चास्मिन्नति भावः। विनैतद ज्योतिषशास्त्रं श्रौत स्मार्त्त कर्म न सिध्यति नित्य व्यबहारे प्रयुक्तत्वात्। किमिदं फलम्? यो ज्योतिषं वेत्ति नरः स सम्यक् धर्मार्थकामान्लभते यशश्च। कीदृशं ज्योतिषं ? पुण्यं रहस्यं परमं च तत्वम्। कथं कालविधानशास्त्रोयं विषये भगवता श्री कृष्णेन निगदितम् – अब्यक्तात् व्यक्तयः सर्वा प्रभवन्त्यहरागमे। रात्र्यागमें प्रलीयन्ते तत्रैवाव्यक्त संज्ञके।। कालस्य सृष्ट्यादौतस्य प्रवृत्तिः। प्रलये तदन्तः। तथा च शास्त्रान्तरे– ''कालः पचति भूतानि सर्वाण्येव सहात्मना, कान्ते स पक्कवस्तेनैव सहाव्यक्ते लयंब्रजेत्।

**मुख्यशब्दः** ज्यौतिषशास्त्रस्य, वैज्ञानिकत्व, कालविधानशास्त्रोयं

**प्रस्तावना**
कालस्य प्राक्तन प्राकृतिकलयादनन्तरं व्यक्ति जनकानां भग्रहाणां प्रादुर्भावेसति दिनमासवर्षयुगादीनां युगपदेकहेलया प्रवृत्तित्वात् शास्त्रस्यास्य जनकता सिद्धं भवति। एतादृशं ज्योतिषशास्त्रं स्कन्धत्रयात्मकं सिद्धान्त संहिताहोराश्चेति विद्यते। तत्र सिद्धान्तस्य लक्षणं कथयति भास्कराचार्यः। तद्यथा –

त्रूट्यादि प्रलयान्त कालकलना मानप्रभेद क्रमा –
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रह संस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रवन्धे वुधैः।।[1]

त्रुट्यादि प्रलयान्तकाल पर्यन्तं कालकलनद्योतकं ज्योतिषशास्त्रम्। सिद्धान्त प्रशंसाऽपि भास्कराचार्येण निगदितम। तद्यथा –
जाननजातकसंहिताः सगणितस्कन्धैकदेशा अपि
ज्योतिः शास्त्र विचारसारचतुर प्रश्नेष्व् किंचित्करः।
यः सिद्धान्तमनन्त युक्ति विततं नो वेति भित्तौयथा
राजाचित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः।।
गर्जत्कुंजरवर्जिता नृपचमूरप्यूर्जिता ऽश्वादिकै –
रूद्यानं च्युतचूतबृक्षमथवा पाथोविहीनं सरः।
योषित प्रोषितनूतन प्रियतमा यद्वन्न भात्युच्चकै –
ज्योतिः शास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः।।[2]

अपिच लगधऋषिणा –

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वेदांग शास्त्राणां ज्योतिषं मूर्ध्नि स्थितम्।।[3]

ज्योतिः शास्त्रस्य वेदांगत्वं निरूपयति भास्कराचार्यः। यथा –
वेदास्तावत् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्तेतु कालाश्रयेण।
शास्त्रातदस्मात् कालबोधो यतः स्यात् वेदांगत्वं ज्योतिषस्योक्तमस्मात्

शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरूक्तं च कल्पः करो।
यातु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः।।
वेदचक्षुः किंलेदं स्मृतं ज्योतिषं मुख्यता वांगमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषांगेन हीनो न किंचित्करः।।[4]

ज्योतिषं स्कन्धत्रयात्मकं प्रसिद्धम्। तत्र संहिताहोरास्कन्धयोः बराहमिहिरादिभिराचार्यवर्यैः सम्यक्तया प्रतिपादितम्। होरासंहितयोर्ल–क्षणे यथा निरूक्ते तथैव सिद्धान्तलक्षणेनापि भबितब्यम्। एतरलक्षणंतु लध्वार्य भट्टोक्तं सिद्धान्त लक्षण मूलकमेव।
उक्तं च – ''आर्यभट्टस्त्रीणि निगदितं गणितं काल क्रियां गोलम।[5] गणितं प्रसिद्धम व्यक्ताब्यक्तरूपम। कालक्रिया काल विभागम्। गोलं ग्रह चारादि साधनोपलक्षितम्। यत्र सिद्धान्ते अभीष्टसमयमधिकृत्य ग्रहादि। चारविचारः क्रियते तत्तन्त्रेभिच्युच्यते, करणमितिवा।
''श्रुतिस्त्रैकाण्डकी'' ति प्रसिद्धम् ज्ञानोपासनाकर्म–प्रभेदात्। कर्मणे ज्ञान प्रतिपादकत्वात्। वेदा कर्मोपासना–ज्ञानप्रतिपादका। यज्ञकर्मप्रवृत्ता वेदा। यज्ञाः तु कालाश्रयेण कथितम। कालबोधकशास्त्र ज्योतिषम, कारणादस्मात् वेदांगेषु प्रधानमंगरूपं ज्योतिषम्।
लौकिकवैदिककार्य व्यापारमात्रंच समयाधीनत्वात्। एतद्ज्ञानं येनशास्त्रेण भवति तज्ज्योतिषम्।
ज्योतिषशास्त्रस्य वेदनेत्रत्वेन् तत्र वेदांगत्वेन वेदवन्मन्यते।
कः होरास्कन्धः जिज्ञासा भवति।
होरार्थं शास्त्रं होरा होरात्र विकल्पमेके वाञ्छन्ति।
अहस्च रात्रिश्च अहोरात्रो होरा शब्देनोच्यते। अहोरात्र शब्दस्य पूर्व वर्ण (अ) परवर्ण (त्र) च लोपे सति होरा शब्दं निष्पन्नं भवति। पुनश्च जिज्ञासा समायन्ति यत् अहोरात्र शब्देनैव होरा शब्दं कथं निष्पन्नं भवति। ध्यातव्यं यत् प्रवह वेगवशात् एकस्मिन्नेवाहोरात्रे मेषादि द्वादश राशयः भ्रमन्ति। अस्मात् लग्न संज्ञापि अभिहिता। लग्नाधारे एव शुभाशुभफल ज्ञानं शास्त्रेण भवति जीवस्य जन्म कालिकेन ग्रहस्थित्या तिथिनक्षत्र्यादिकैर्वा सुखदुःखादेः निर्णयः, येन शास्त्रेण भवति, तदेव होराशास्त्रं, जातकं जातकशास्त्रंवा कथ्यते।
बराहस्य वचनमपि ''होरेत्यहोरात्र विकल्पत्वात् ''संगच्छते।
होरा विषये अपि च बराहस्य वचनम्। यथा –

''होराऽन्योङग विनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः''
''ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते''[6]

ज्योतिष शास्त्रं सर्वश्रेष्ठं नेत्ररूपत्वात् नेत्रे गोल प्रकाशकत्वाच्वेति। संहितायां ग्रहचारस्य व्यवस्था विद्यते। वृष्टि – विज्ञानमस्यामिति भावः। मौसम विज्ञानस्य सम्यकतया निरीक्षणं संहितायाः विषयं। महामारी, सुभिक्षः दुर्भिक्षः, भूकम्प, कृषेः पूर्वानुमानं राज्यपरिवर्तनस्य विषय विवेचनञ्च संहितायाः विषयम्।
बराहमिहिरस्य संहिताऽमूल्य निधिरूपेण प्रतिष्ठिता। ऋषीनांपूर्वाचार्याणाञ्च संहिता मुहूर्त–विज्ञानस्य मूलमेव प्रतिभाति। ''संहिता पारगो दैवचिन्तको भवति वराहस्योक्तिः वैशिष्ट्यं भजते। मिटिआरोलॉजी एवं नैच्युरल एस्ट्रोलॉजी कथ्यते।
होराभागस्यन्तर्गते अनेकाणि शाखानि सन्ति –

1. **पराशरमतम् :** फलित ज्योतिषशास्त्रस्य सर्वमान्या बहुप्रचलिता च पद्धतिः विद्यते। महर्षि पराशरः अस्य सिद्धान्तस्य मुख्य–प्रवर्त्तकोस्ति। कथितमपि पराशर स्मृतं कलौयुगे। बृहत्पाराशर होराशास्त्रम्, लघुपाराशरी च होरा विषयकं बहुमान्यं ग्रंन्थं विद्यते। लघुपाराशरी ''गागरे सागरमिति'' कथनं चरितार्थं करोति। पराशरस्य संहिता भागोऽपि विद्यते।
2. **जैमिनीमतम् :** ज्योतिषशास्त्रस्य अष्टादश प्रवर्त्तकेषु एकः प्रवर्त्तकः जैमिनि अपि विद्यते। एकेनापरेण विधिना फला–देशकथन विधिरस्य महानुभावस्य वैशिष्ट्यम्। अस्य सिद्धान्तप्रतिपादन शैली सर्वत्र समाहृता शोभिता। दक्षिण भारते महानुभावस्य मत प्रचलनं विशेषकरं विद्यते। ''जैमिनी सूत्रम'' फलित ज्योतिषस्य बहुमान्यं प्रसंशितं ग्रंन्थं विद्यते। सारगर्भितस्य सूत्रस्य रचना ग्रन्थस्य वैशिष्ट्यम्।
3. **केरल मतम :** आधुनिक भाषायां ''नम्बरोलॉजी'' कथ्यते। ग्रन्थेऽस्मिन जन्मदिनस्य जन्मनामाक्षरस्य वा संख्यायाः पिण्डीकृत्य (पिण्डं निर्मित्य) फला–देश कथनस्य अपूर्वा विधिः विद्यते। ''न्यूमरालॉजी'' नाम्नापि व्यवहृतं विद्यते।'' अंक विद्या''नाम्ना ख्याति प्राप्ता विद्यते।
अस्याशाखायारूद्गम् स्थानं केरल देशः विद्यते। कारणादस्मात् केरल मतेन व्यबहृतं प्रसिद्ध च विद्यते। केरलीय ज्योतिष नाम्नापि कथ्यते। पाठ्य ग्रन्थेषु अस्य–स्थानं विद्यते। वर्ष–मास–दिनानां पिण्डीकरण विधिनां फलादेशस्याधुनिक विधिरूपेण प्रतिष्ठितः विद्यते।

अर्थार्जने सहायकं ज्योतिष शास्त्रम्।
एतादृशं स्वरूपं प्रतिष्ठितं ज्योतिषशास्त्रस्य।।

4. **भृगुसंहिता :** भृगोरन्वर्थकं नाम भृगुसंहिता शब्देन वाच्यमिति। सिद्धान्तस्यास्य प्रवर्तकः महर्षि भृगुः एव। कारणादस्मात् भृगु–संहिता कथ्यते। सिद्धान्तस्येयं विशेषता यत् 1800 (अष्टादश–शतोत्तर) कुण्डलयः सन्ति, यासु कुण्डलीषु फलं लिखितं विद्यते। सर्बेषां जन्मकुण्डलयः फलादेष संहितं विद्यमानाः सन्ति। सर्वं फलं प्राप्तं भवति, इयमेव विशेषता अस्या संहितायाः। सर्बेषां मानवानां वर्गीकरणं अष्टशतोत्तर सहस्त्रवर्गेशु एव वर्गीकृतं विद्यते। अस्यानुकरणीया सूर्यसंहिता अरूण संहिता रावण संहिता चेति। सर्वत्र उपलब्धं नास्ति।
5. **सामुद्रिकशास्त्रम् :** हस्तरेखा विद्वान ''पामेस्ट्री'' अपि कथ्यते। हस्तरेखां, मस्तिष्क रेखां चावलोकनं पश्चात्फलादेशस्य विधिः प्रतिस्ठिता विद्यते। हस्तरेखा माध्यमेन भविष्य शुभाशुभ फल कथन विधिः विद्यते। हस्तरेखा विज्ञानमति सूक्ष्मं विद्यते। सुप्रसिद्धः भविष्यवक्ता ''जॉन ई0 वार्नर कादूरो'' स्वकीयेन भविष्यवाणीभिः योरोप देशो सर्वानचंभितं कृतवान्। अस्माकं देशादेव शिक्षा प्राप्तम। ''कादूरोज गाइड टू दि हैण्ड '' नामके ग्रन्थे एतादृशं विवेचनं प्राप्तं भवति। आयरलैंडस्य विद्वान कादूरो सन् 1883 ई. तः 1891 ई. यावत् अक्ष्रौवर्श पर्यन्तं अत्रत्यैव शिक्षा अर्जितवान्। भविष्यवक्ता विदुषः सर्वत्र प्रतिष्ठा विद्यते।
6. **प्रश्नज्योतिषम् :** प्रश्न ज्योतिषं ज्योतिषशास्त्रस्य महत्वपूर्णमंगं विद्यते। अस्मिन् शास्त्रे जन्मदिनस्य, जन्मकालस्य वा आवश्यकता न भवति, अपितु स्वतन्त्ररूपेण प्रश्नसंहिता दृष्ट्या भविष्य कथनं विधिः प्रशस्ता विद्यते। तात्कालिकस्य समयस्य ग्रहनक्षत्रयोरिस्थितिमवगम्य सर्व फलादेशं भवति। जातिके एवं जातके स्वतंत्ररूपेन अस्य प्रश्नज्योतिषस्य सम्यक्तया विवेचनं परिलक्षितम। प्रश्नभूषणे संहितायांच प्रश्नज्योतिषस्य विवेचन परिदृश्यते।
7. **गोचर–पद्धति :–** गोचर पद्वतौ ग्रहाणां नक्षत्राणां च वर्तमान स्थित्यनुसारेण काले–काले परिवर्तनमपेक्षितं विद्यते। जन्मकालिकस्य चन्द्रस्य स्थितिवशात् कियदंशस्य राश्यान्तरस्य वा कोणं निर्मितं भवति, तदनुसारेण फलादेशं भवति।
8. **शकुनशास्त्रम् :** शास्त्रेऽस्मिनजीव–जन्तूनां चेष्ट्या शकुनं नाम अदभुद–विषय विवेचनस्यैव। अद्भुद–सागर, अद्भुद दर्पणं चास्योदाहरणं विद्यते। वासन्तराज शकुनम् शकुन शास्त्रस्य

महत्वपूर्णं ग्रन्थं विद्यते। एतदरिक्तं संहिता। ग्रन्थेष्वस्य शकुनस्य वर्णनं विशदरूपेण परिदर्शनं भवति। वशिष्ठपाराशर, गर्गानां विषयेऽस्मिन बहुविस्तरेण सम्यकतया विवेचनं परिलक्षितम्।

9. **अस्टकवर्ग :** पद्धतिरियं बहुशः गोचर पद्धत्या साम्यत्वं दधाति किन्तु फल कथन प्रणाल्यामन्तरं विद्यते। अस्यां पद्धतौन केवलं जन्म कालिकस्य चन्द्रस्य स्थिति वर्तमान कालिकस्य ग्रहाणां वा स्थितिः एवं नावलोक्यते अपितु जन्मकालिकस्य ग्रहाणां स्थितिबशात् वर्तमानकालिकस्य ग्रहाणां स्थिते तुलनात्मकमध्ययनं – कृयते। प्रत्येकस्य ग्रहस्य परस्परस्य कोणस्यापि विचारं भवति।
10. **स्वर पद्धति :** अस्यां पद्धतौ सम्पूर्ण चराचरं पंचतत्वेन निर्मित मन्यते। अग्निजलवायुभूमिराकाशश्चेति पंचतत्वात्मकं मानवानां शरीरम् विद्यते। प्राणीनां शरीरे समये–समये भिन्नं भिन्नं स्वरमर्थात् पंचतत्वं प्रवाहितं भवति। एषाम पंचस्वरानामाधारे एव भूतं–भविष्यं–वर्तमानञ्च फलं कथितम्। दार्शनिक वैज्ञानिकञ्च पृष्ठभूमौ स्वरपद्धतैः फलादेशे महत्वपूर्ण योगदानं विद्यते।
11. **मुहूर्त्तम् :** अस्मिन् खलु संसारे मानवानां जीवनं जन्मजन्मान्तर्गतं संचितकर्मणः शुभाशुभ स्वरूपम्। अस्यां शाखायां प्रत्येकं कार्य सम्पादयितुं ग्रहनक्षत्राणां तात्कालिकं स्थित्यनुसारेण शुभाशुभं कालस्य विचारं भवति, कर्मणो कालधीनत्वात्। यथैव बींज तथैव फलं यथैव कर्म, तथैव मानवस्य शुभाशुभस्वरूपमित्यनुसारेण, शुभकाले कृतं कर्म शुभमशुभे काले कृतं कर्मशुभं भवति, मानवानां मुहूर्त विचारं परमोपयोगि व्याबहारिक जीवने। यात्रायां, शुभसंस्कार कर्मणि, गृहारंभगृहप्रवेशयोः काले एतस्य मुहूर्तविज्ञानस्य आवश्यकता पदे–पदे परिलक्षितं। विषयऽस्मिन् अनन्तदैवज्ञसुतस्या रामाचार्यस्य मुहूर्तविज्ञानम्, "मुहूर्त्त चिन्तामणि" नामकं ग्रन्थं बहुचर्चितं ख्याति प्राप्तञ्च विद्यते एतदरिक्तं मुहूर्त–मार्त्तण्ड, मुहूर्तकल्पद्रुम अन्येऽपि च ग्रन्थः स्वप्न ज्योतिषं शास्त्रस्यास्य प्रमुख्येन विराजते। प्रकारेणानास्माकं ज्योतिष विज्ञानं अनेकेषु भागेषु अनेकासु शाखासु विभक्तं विद्यते। अवैदिक युगाद्यद्य पर्यन्तं ज्योतिष विज्ञानं विकासोन्मुखं विद्यते। अस्माकं ज्योतिष विज्ञानमति व्यापकमसीमितञ्चेति।

विषयेऽस्मिन् वचनम्। यथा –

लक्षंतुवेदा चत्वारो लक्षं भारतमेव च।
लक्षं व्याकरणं प्रोक्तं चतुर्लक्षंतु ज्योतिषम्।।[7]

चतुर्णा वेदानां संख्या लक्षमेकं विद्यते। महाभारतस्यश्लोक संख्या लक्षमेकम्व्याकरणस्यापि श्लोकसंख्या लक्षमेकं, किन्तु ज्योतिशशास्त्रं चतुर्लक्षान्वितं व्यापकं विद्यते।

यद्यपि कालतत्वं केवलमतीन्द्रियदृग्भिराचार्यरेव स्वयं सवेद्यं भवितुं शक्यते तथापि लौकिक व्यावहारिक क्रियासाधनार्थंतु अयं गणनात्मको जातः। अयमेव ज्योतिषशास्त्रस्य मूलभूतः प्रतिपाद्य विषयः। एतत्सम्पादनं तु भचक्र चलनेनैव सम्भाव्यते नान्येन। भचक्रः एकः गोलविशेषो वरीवर्ति यः ग्रह–नक्षत्राणां समसमत्वेनैको भौमोपाधिरहितः कश्चित् प्रदेश विशेषः।

## संदर्भा


1. सिद्धा. शि. कालमा. श्लो. 6
2. सिद्धा. शि. कालमा श्लो. 7–8.
3. वेदांग ज्यो. श्लो. – 5
4. सिद्धा. शि. कालमा. अ. श्लो. – 9–11
5. आर्यभटीयम दशगीतिकायां
6. वृहसंहिता अ. 1 श्लोक – 9
7. ज्योति नवनी पृ0 31